# શ્રીગુરુવાતપુરાધીશાષ્ટોત્તરશતનામસ્તોત્રમ્

Shri GuruvAtapurAdhIshAShTottarashatanAmastotram

sanskritdocuments.org

December 2, 2018

# Shri GuruvAtapurAdhIshAShTottarashatanAmastotram

# શ્રીગુરુવાતપુરાધીશાષ્ટોત્તરશતનામસ્તોત્રમ્

## Sanskrit Document Information

Text title : guruvAyupurAdhIshAShTottarashatanAmastotram

File name : guruvAyupurAdhIshAShTottarashatanAmastotram.itx

Category : vishhnu, krishna, aShTottarashatanAma

Location : doc_vishhnu

Author : Brahmasri Sengalipuram Anantharama Dikshitar

Transliterated by : PSA Easwaran psaeaswaran at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Latest update : December 2, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

December 2, 2018

*sanskritdocuments.org*

Shri GuruvAtapurAdhIshAShTottarashatanAmastotram

# શ્રીગુરુવાતપુરાધીશાષ્ટોત્તરશતનામસ્તોત્રમ્

ધ્યાનમ્ -
પીતામ્બરં કરવિરાજિતશઙ્ખચક્ર-
કૌમોદકીસરસિજં કરુણાસમુદ્રમ્ ।
રાધાસહાયમતિસુન્દરમન્દહાસં
વાતાલયેશમનિશાં હૃદિ ભાવયામિ ॥

કૃષ્ણો વાતપુરાધીશઃ ભક્તકલ્પદ્રુમઃ પ્રભુઃ ।
રોગહન્તા પરં ધામા કલૌ સર્વસુખપ્રદઃ ॥ ૧॥

વાતરોગહરો વિષ્ણુઃ ઉદ્ધવાદિપ્રપૂજિતઃ ।
ભક્તમાનસસંવિષ્ટઃ ભક્તકામપ્રપૂરકઃ ॥ ૨॥

લોકવિખ્યાતચારિત્રઃ શઙ્કરાચાર્યપૂજિતઃ ।
પાણ્ડ્યેશવિષહન્તા ચ પાણ્ડ્યરાજકૃતાલયઃ ॥ ૩॥

નારાયણકવિપ્રોક્તસ્તોત્રસન્તુષ્ટમાનસઃ ।
નારાયણસરસ્તીરવાસી નારદપૂજિતઃ ॥ ૪॥

વિપ્રનિત્યાન્નદાતા ચ વિવિધાકૃતિશોભિતઃ ।
તૈલાભિષેકસન્તુષ્ટઃ સિક્તતૈલાર્તિહારકઃ ॥ ૫॥

કૌપીનદરુજાહન્તા પીતામ્બરધરોઽવ્યયઃ ।
ક્ષીરાભિષેકાત્સૌભાગ્યદાતા કલિયુગપ્રભુઃ ॥ ૬॥

નિર્માલ્યદર્શનાદ્ભક્તચિત્તચિન્તાનિવારકઃ ।
દેવકીવસુદેવાત્તપુણ્યપુઞ્જોઽઘનાશકઃ ॥ ૭॥

પુષ્ટિદઃ કીર્તિદો નિત્યકલ્યાણતતિદાયકઃ ।
મન્દારમાલાસંવીતઃ મુક્તાદામવિભૂષિતઃ ॥ ૮॥

પદ્મહસ્તશ્ચક્રધારી ગદાશઙ્ખમનોહરઃ ।

ગદાપહન્તા ગાઙ્ગેયમોક્ષદાતા સદોત્સવઃ ॥ ૯॥

ગાનવિદ્યાપ્રદાતા ચ વેણુનાદવિશારદઃ ।
ભક્તાન્નદાનસન્તુષ્ટઃ વૈકુણ્ઠીકૃતકેરળઃ ॥ ૧૦॥

તુલાભારસમાયાતજનસર્વાર્થદાયકઃ ।
પદ્મમાલી પદ્મનાભઃ પદ્મનેત્રઃ શ્રિયઃપતિઃ ॥ ૧૧॥

પાદનિસ્સૃતગાઙ્ગોદઃ પુણ્યશાલિપ્રપૂજિતઃ ।
તુળસીદામસન્તુષ્ટઃ વિલ્વમઙ્ગળપૂજિતઃ ॥ ૧૨॥

પૂન્તાનવિપ્રસન્દૃષ્ટદિવ્યમઙ્ગળવિગ્રહઃ ।
પાવનઃ પરમો ધાતા પુત્રપૌત્રપ્રદાયકઃ ॥ ૧૩॥

મહારોગહરો વૈદ્યનાથો વેદવિદર્ચિતઃ ।
ધન્વન્તરિર્ધર્મરૂપો ધનધાન્યસુખપ્રદઃ ॥ ૧૪॥

આરોગ્યદાતા વિશ્વેશઃ વિધિરુદ્રાદિસેવિતઃ ।
વેદાન્તવેદ્યો વાગીશઃ સમ્યગ્વાક્છક્તિદાયકઃ ॥ ૧૫॥

મન્ત્રમૂર્તિર્વેદમૂર્તિઃ તેજોમૂર્તિઃ સ્તુતિપ્રિયઃ ।
પૂર્વપુણ્યવદારાધ્યઃ મહાલાભકરો મહાન્ ॥ ૧૬॥

દેવકીવસુદેવાદિપૂજિતો રાધિકાપતિઃ ।
શ્રીરુક્મિણીસત્યભામાસંલાલિતપદામ્બુજઃ ॥ ૧૭॥

કન્યાષોડશસાહસ્રકણ્ઠમાઙ્ગલ્યસૂત્રદઃ ।
અન્નપ્રાશનસમ્પ્રાપ્તબહુબાલસુખપ્રદઃ ॥ ૧૮॥

ગુરુવાયુસુસઙ્ક્લૃપ્તસત્પ્રતિષ્ઠઃ સુરાર્ચિતઃ ।
પાયસાન્નપ્રિયો નિત્યઙ્ગજરાશિસમુજ્જ્વલઃ ॥ ૧૯॥

પુરાણરત્નપઠનશ્રવણાનન્દપૂરિતઃ ।
માઙ્ગલ્યદાનનિરતઃ દક્ષિણદ્વારકાપતિઃ ॥ ૨૦॥

દીપાયુતોત્થસજ્જ્વાલાપ્રકાશિતનિજાલયઃ ।
પદ્મમાલાધરઃ શ્રીમાન્ પદ્મનાભોઽખિલાર્થદઃ ॥ ૨૧॥

આયુર્દાતા મૃત્યુહર્તા રોગનાશનદીક્ષિતઃ ।
નવનીતપ્રિયો નન્દનન્દનો રાસનાયકઃ ॥ ૨૨॥

યશોદાપુણ્યસઞ્જાતઃ ગોપિકાહૃદયસ્થિતઃ ।
ભક્તાર્તિઘ્નો ભવ્યફલઃ ભૂતાનુગ્રહતત્પરઃ ।
દીક્ષિતાનન્તરામોક્તનામસુપ્રીતમાનસઃ ॥ ૨૩॥

ગુરુવાતપુરીશસ્ય નામ્નામષ્ટોત્તરં શતમ્ ।
દીક્ષિતાનન્તરામેણ ભક્ત્યા સ્તોત્રં કૃતં મહત્ ॥ ૨૪॥

શ્રદ્ધાયુક્તઃ પઠેન્નિત્યં સ્મરન્ વાતપુરાધિપમ્ ।
તસ્ય દેવો વાસુદેવઃ સર્વાર્થફલદો ભવેત્ ॥ ૨૫॥

ઇતિ બ્રહ્મશ્રી સેંગલીપુરં અનન્તરામદીક્ષિતવિરચિતં
શ્રીગુરુવાતપુરીશાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri GuruvAtapurAdhIshAShTottarashatanAmastotram*
pdf was typeset on December 2, 2018

Please send corrections to *sanskrit@cheerful.com*